National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(25): 136-139
© 2019 NJHSR
www.sanskritarticle.com

डॉ.श्रीनिवासपण्डा
सहायकाचार्यः,ज्योतिर्विज्ञानविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

Correspondence:
डॉ.श्रीनिवासपण्डा
सहायकाचार्यः,ज्योतिर्विज्ञानविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

# ज्योतिषशास्त्रौ प्रतिपादितानां राजयोगानामध्ययनम्

**डॉ. श्रीनिवासपण्डा**

सामान्यतया खगोलीयेस्थितानां सूर्यचन्द्रादि ज्योतिर्पिण्डानां-गति-स्थिति-प्रभावाञ्चाधारीकृत्य शुभाशुभफलद्योतकं शास्त्रं नाम ज्योतिषशास्त्रम्। अस्माकं वैदिककर्मसम्पादनाय कालशास्त्रोऽयं चक्षुस्वरूपं सर्वदा सर्वथा च स्वकीयं महत्वं प्रतिपादयति। न केवलं वैदिकसंस्काराणां सम्पादनार्थम् अपि तु मानवजीवने संघटितानां शुभाशुभसंभाव्य घटणानां ज्ञानं केवल ज्योतिषशास्त्रेणैव सूक्ष्मतया समाधितं भवति। यथा नारदपुराणे-

**जातके राशिभेदाश्च ग्रहयोनिश्च योनिजम्।**
**निषेकजन्मारिष्टानि ह्यायुर्दायो दशाकमः।।**
**कर्मजीवं चाष्टवर्गे राजयोगाश्च नाभसाः।**
**चन्द्रयोगाः प्रवज्याख्या राशिशीनां च दृक्कालम्।**
**ग्रहभावफलं चैकश्रययोग प्रकीर्णके।**
**अनिष्टयोगाः स्त्रीजन्मफलं निर्णयमेव च।।**
**नष्टजन्मविधानं च तथा द्रेष्काणलक्षणम्।।**[१]

ज्योतिषशास्त्रे योगविचारः महत्वपूर्णं स्थानमावहति। योगः नाम सम्बन्धः। ग्रहाणां योगवशात् बहुविधयोगानां उत्पन्नः जायन्ते। होरास्कन्धे जन्मेष्टकालमाधारीकृत्य जातकस्य जन्मकुण्डली निर्माणं भवति। तत्र लग्नानुरोधेन द्वादशराशयः द्वादशभावाः भवन्ति। एवं द्वादशभावेषु अवस्थितानां एकाधिकग्रहाणां चतुर्विधसम्बन्धवशात् एवं अन्य विविध स्थितिवशात् विविधशुभाशुभयोगानां उत्पत्तिः जायन्ते। मानवजीवने विभिन्न विशिष्टयोगाः-अरिष्टं कष्टं, भाग्य, दुर्भाग्यं च सर्वं खलु ग्रहयोगेन फलं प्रयच्छति। तत्र भेदद्वयं ज्ञायते। येन ग्रहयोगेन प्रत्येकक्षेत्रे सफलता प्राप्यते। अर्थात्, व्यक्तित्वविकासः, राजनैतिकसफलता, धनलाभः, उत्तमशिक्षा, शारीरिक तथा मानसिकविकासः, मानसिकवलं, रमणीयभार्या, कर्त्तव्यपरायणपुत्रः, सन्मित्रं, मानवीयसर्वाङ्गीणविकासः सौभाग्यं राजयोगाश्च भवन्ति। ते ग्रहयोगैरुत्पद्यन्ते। तत्र येन योगेन राज्यप्राप्तिः धनाप्तिस्तथाभ्युदयश्च समेत ज्ञायते तद् राजयोग इति।

**पञ्चमहापुरुषयोगः**

**मूलत्रिकोणनिजतुङ्गगृहोपयाता**
**भौमज्ञजीवसितभानुसुता बलिष्ठा।**
**केन्द्रस्थिता यदि तदा रुचभद्रहंस-**
**मालव्यचारुशशयोगकरा भवन्ति॥**[२]

राजयोगानां मध्ये पञ्चमहापुरुषयोगाः प्रसिद्धा सन्ति। ते च क्रमेण- (१) रूचकः, (२) भद्रः, (३) हंसः, (४) मालव्यः, (५) शशयोगश्च। पञ्चताराग्रहाः योगकारकाः मन्यन्ते। ग्रहबलानुरोधेन योगस्योत्कृष्टत्वं न्यूनं

च तारतम्येन ज्ञेयम्। बृहत्संहितायां पुरुषलक्षणाध्याये ते योगाः निरूपितास्तत्र होरासामुद्रिकयोः समन्वितरूपं प्रदर्शितमाचार्येण। तत्र पञ्चमहापुरुषयोगानां लक्षणानि-बलवान् मङ्गलबुधगुरुशुक्रशनयः यदि स्वगृहस्थाः स्वोच्चस्थाः, केन्द्रगाः भवेयुस्तदा, क्रमादृचकभद्रहसमालव्यशशसंज्ञकाः पञ्चमहापुरुष-योगाः भवन्ति।

**रुचक-योगफल**

**जातः श्रीरुचके बलान्वितवपुः श्रीकीर्तिशीलान्वितः**
**शास्त्री मन्त्रजपाभिचारकुशलो राजाऽथवा तत्समः।**
**लावण्यारुणकान्तिकोमलतनुस्त्यागी जितारिर्धनी**
**सप्तत्यब्दमितायुषा सह सुखी सेनातुरङ्गाधिपः॥३**

रुचकयोगादुत्पन्नः जातकस्य शरीरसौष्ठवं, सुन्दरं बलवानञ्च भवति। सैव जातकः श्रीकीर्त्तिशीलान्वितः, शास्त्रकर्त्ताः मन्त्रभिचारः कुशलः शत्रुजित् सुगुणविशिष्टः कुशलराजा भवति अर्थात् राजा सदृशः धनवान्, लावण्यः अरुणाभकान्ति द्वारा युक्त कोमलस्तनुः, सुखी, तथा सेनाश्वययोः युक्त सप्तायब्दमितायुर्भोगं करोति।

**भद्र-योगफल**

**शार्दूलप्रतिमाननो गजगतिः पीनोरुवक्षःस्थलो**
**लम्बापीनसुवृत्तबाहुयुगलस्तत्तुल्यमानोच्छ्रयः**
**मानी बन्धुजनोपकारनिपुणः श्रीभद्रयोगोद्भवो**
**राजाऽ शीतिमितायुरेति विपुलप्रज्ञायशोवित्तवान्॥**

भद्रयोगादुत्पन्नः जातकस्य आननः शार्दूलसमं भवति। इतोऽपि तस्य गजसमं गतिः जंघा वक्षस्थलः चेत्यनयोः द्वयोः पृष्ठोऽपि भवति। तस्य वाहुद्वयः दक्षिण एतस्य मध्यमा अङ्गुष्ठयायाः अन्तिमंशात् वामहस्तस्य मध्यमा अङ्गुष्ठयायाः अन्तिमंशः पर्यन्तं विस्तार तुल्य लम्बा पुष्टो, सुवृतः च भवति। स मानी बन्धुजनोपरकारनिपुणः, विपुल प्रज्ञाश्चेत्यादि गुणयुक्तो भवति। इतोऽपि स यशः तथा प्रबलधनसम्पदयुक्ते राजाऽपि भवति। तस्य अनुकालः आशीति वर्षयावत्कालपर्यन्तं भवति।

**हंस-योगफल**

**रक्तास्योन्नतनासिकः सुचरणो हंसस्वरः श्लेष्मको**
**गौराङ्गः सुकुमारदारसहितः कन्दर्पतुल्यः सुखी।**
**शास्त्रज्ञानपरायणोऽतिनिपुणः श्रीहंसयोगे गुणी**
**यातोऽशीतिकमायुरेति सयुगं साधुक्रियाचारवान्॥४**

हंसयोगादुत्पन्नः पुरुषः रक्ताभवपुः, उन्नतनासिका द्वारा सुशोभिताननः सुचरणः विशिष्टो भवति। सैव पुरुषः हंसस्वरः, श्लेष्मायुक्तः, सुकुमारदारयुक्तो च भवति। एतेषां गुणाधिकारी व्यक्तिः कामदेववत् सुखी, शास्त्रज्ञः, गुणवान् साधुक्रियाचारवान् अपि भवति। स अशोकमायुरेति भवति।

**मालव्य-योगफल**

**स्त्रीचेष्टो ललिताङ्गसन्धिनयनः सौन्दर्यशाली गुणी**
**तेजस्वी सुतदारवाहनधनी शास्त्रार्थवित्पण्डितः।**
**उत्साहप्रभुशक्तिमन्त्रचतुरस्त्यागी परस्त्रीरतः**
**सप्तत्यब्दमुपैति सप्तसहितं मालव्ययोगोद्भवः॥५**

मालव्ययोगदुत्पन्नः व्यक्तिः स्त्रीचेष्टो भवति। स स्त्री सदृशः तस्य शरीरः नयनश्चेति। इतोऽपि तस्य गुणमपि स्त्रीसदृशं भवति। स अतीव तेजस्वी, सुतक्षारवाहनधनी, शास्त्रार्थविपण्डितश्चेत्यादि गुणाधिकारीं भवति। स उत्साहीं, प्रभूतशक्तिसम्पन्नं, मन्त्रचतुरं, परस्त्रीतं, उदारं च भवति, तस्य आयुकालं सप्तसप्तति वर्षयावत्पर्यन्तं भवति।

**शश-योगफल**

**भूपो वा सचिवो वनाचलरतः सेनापतिः क्रूरधी-**
**र्धातोर्वादविनोदवञ्चनपरो दाता सरोषेक्षणः।**
**तेजस्वी निजमातृभक्तिनिरतः शूरोऽसिताङ्गः सुखी**
**जातः सप्ततिमायुरेति शशके जारक्रियाशीलवान्॥**

शशयोगतः सृष्टः व्यक्तिः सर्वदा राजा, राजमन्त्री, वनाचलरतः, सेनापतिः, क्रूरधी, धातोर्वादविनोदवञ्चनपरो च भवति। स दाता, क्रुद्धनयनः, तेजस्वी, निजमातृशक्तिः, शूरः, श्यामलवर्णविशिष्टः, सुखी, परस्त्रीरतः चेत्यादि गुणाधिकारीं भवति। तस्य आयुकालः सप्ततिवर्षयावत्कालपर्यन्तं भवति।


**रुचकयोगस्य प्रथमुदाहरणम् :-**

**भारतवर्षस्य प्रधानमन्त्री श्रीनरेन्द्र मोदीः**

जन्मदिनाङ्क-१७.०९.१९५०

जन्मसमय ११.००

अत्र कुण्डल्यां वृश्चिकराश्याधिपा भौमः लग्नेशः सन् स्वभावे तथा केन्द्र भावे तिष्ठति। पुनः गुरुणा दृष्टः भवति। अतः रुचकयोगः जातः। जातकः साहसी उच्चशीक्षितः दक्षराजनीतिज्ञः, अभिमनी, परिश्रमीः तथा भारतवर्षस्य प्रधानमन्त्रीः यशस्वी रूपेण सम्प्रति स्थानमलंकरोति।



**रुचकयोगस्य द्वितीयोदाहरणम्**

**उत्कलकेशरी डॉ.हरेकृष्ण महताव**


जन्म दिनाङ्क- २१.११.१९००

गुरु महादशाभोग्यवर्ष- व-५-४-१८

उत्कलकेशरी डा.हरेकृष्ण महताव महोदयस्य कुण्डली उपस्थाप्यते।

अस्य कुण्डल्यां रुचकयोगोऽपि विद्यते।

अत्राऽपि मङ्गलः स्वगृहे केन्द्रे तिष्ठति। लग्नाधिपतिः रविः, द्वितीयाधिपतिः शुक्रः, तृतीयाधिपः बुधः, पञ्चमाधिपः गुरुः, मङ्गलः युक्तो भवति। मङ्गलः स्वगृही वर्त्तते। जातकः दरिद्रपरिवारे जन्मग्रहणं कृत्वाऽपि साहसी, उच्चशीक्षितः तथा दक्षराजनितिज्ञः तथा ओडिशाराज्यस्य प्रथम प्रधानमन्त्रीः आसीत्। एवं पश्चात् वाणिज्यस्तथा शिल्पमन्त्री पदमपि अलंकृतवान्।





**भद्रयोगस्योदाहरणम्**

राष्ट्रपति भारतरत्न डा.सर्वपल्लि राधाकृष्णन् महोदयस्य कुण्डलीमुपस्थाप्यते।

जन्मदिनाङ्कः- ५.९.१८८८


अत्र कुण्डल्यां भद्रयोगः वर्त्तते। यतः बुधः स्वगृहं गतः केन्द्र तथा स्वोच्चे तिष्ठति। अतः जातकः राष्ट्रपतिः अभवत्।




**हंसयोगस्योदाहरणम्**

महाराजा वीरविक्रमादित्यमहोदयस्य कुण्डल्यामपि हंसयोगः दृश्यते।

अत्र बृहस्पतिः स्वोच्चगृहे तथा केन्द्र (लग्ने) तिष्ठति। (पञ्चमेशः दशमेशः) मङ्गलः तथा (सप्तमेश अष्टमेशः) शनिः गुरुं पूर्णं पश्यतः। गुरुः मङ्गलं पश्यति, मङ्गलः गुरुं च पूर्णं पश्यति। फलतः पूर्णहंसयोग जातः। एवं जातकः विख्यातराजा आसीत्।





**मालव्ययोगस्योदाहरणम्**

जन्मदिनाङ्कः- १४.११.१८८९/

मृत्यु- २७.५.१९६४

बुधमहादशावशेष- व.१२-९-०

स्वर्गीयजवाहारलाल्नेहरुमहोदयस्य कुण्डलीमुपस्थाप्यते। अत्र शुक्रः चतुर्थस्थः मूलत्रिकोणस्थः, बुधयुक्तस्तथा वर्गेन बलवान् भवति। अतः मालव्ययोगो जातः। अत्र शुक्रोऽपि स्वगृहे तिष्ठति। चन्द्रात् केन्द्रेऽपि तिष्ठति। एतदभिन्न बहुयोगाः विद्यन्ते। अत एव जातकः भारतस्य प्रथम प्रधानमन्त्रीः अभवत। स्वर्गत महोदयस्य शरीरलक्षणमत्र मालव्ययोगोक्त लक्षणवत् अनुमीयते।





**शशयोगस्योदाहरणम्**

झांसी की राणी लक्ष्मीवाई महाशयानां कुण्डलीमुपस्थाप्यते। तुलालग्नं कुण्डल्यामत्र शशकयोगो विद्यते। यथा-

(१)शशकयोगकारकशनिः अत्र (चतुर्थपञ्चमाधिपौ) केन्द्र-त्रिकोणाधिपतित्वेन राजयोगकारकः।

(२) शनिः स्वोच्चेस्तथा केन्द्रे लग्नेस्तथा चन्द्र लग्नेऽपि तिष्ठति। अतः शशयोगो जातः। अत्र शशयोगः पूर्णबलवान् विद्यते। फलस्वरूपः जातकः वीरा नारी (विख्यात राणी) आसीत् एषः महाशयानां विषये

सर्वे परिचिता एव।




राजयोगानां निरूपणार्थं केचन गुरुत्वपूर्णाः विषयाः यथा राजयोगनिर्णये भावभावेशयोः सम्बन्धविचारः, भावेशानां योगकारकत्वम्, ग्रहाणां चतुर्विधसम्बन्धविचारः, ग्रहाणां बलावलविचारः, स्वस्व मित्र-सम-शत्रु सम्बन्धविचारः, उच्च-नीच मूलत्रिकोण-स्वगृहादि स्थानसम्बन्धविचारः, ग्रहाणां दृष्टिविचारः, पुनः ग्रहाणां भाव+भावेश+भावकारकानां सम्बन्धवशात् समुत्पन्न विविधयोगानां लक्षणानि, तेषां फलानि च । समाजे दृश्यते यत् कश्चित् राजा कश्चित् दरिद्रोवा, कथं कश्चित् विद्वान् कश्चित् मुर्खो वा, कश्चित् परोपकारी कश्चित् स्वार्थपरः, पुनः कश्चित् साधुः कश्चित् दुष्टं वा हत्याकारीः। कथमेतत् सर्वं भवतीति जिज्ञासा मानवस्य स्वाभाविकी प्रवृत्तिः भवति। अतः एतेषां प्रश्नानां समाधानार्थं होराशास्त्रस्य उपयोगः यदि क्रियते किञ्चित् लाभप्रदो भविष्यतीति ममाभिप्रायः।

**सहायकग्रन्थसूची**

बृहज्जातकः पं.श्री सीताराम झा-चौखम्बा अमरभारती प्रकाशन, १९८१

ज्योतिषरत्नाकर-देवकीनन्दन सिंह-मोतिलाल वनारसीदास,प्र.सं-१९३४

जातक पारिजात-दैवज्ञवैद्यनाथ विरचित-चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण २०१५ई.

फलदीपिका-गोपेश कुमार औझा-मोतिलाल वनारसीदास प्रथम-संस्करण १९६९, द्वितीयसंस्करण-१९७५

बृहत्पाराशर-होराशास्त्रम्-पराशरमुनि विरचित-चौखम्बाप्रकाशन, वाराणसी, संस्करण-२०७२

भा.क.वि.-मीठालाल हंमतराम ओझा-देवर्षि प्रकाशन सम्बत्-२०७१ इ.सन्-२०१४

**पादटिप्पणी**

१. ना.पु.२/५४/३-६
२. जा.पा.श्लो.-५९,पृ.-३२८
३. जा.पा.श्लो.-६०,पृ.-३२९
४. जा.पा.श्लो.-६३,पृ.-३३१
५. जा.पा.श्लो.-६४,पृ.-३३१